National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2022; 1(44): 229-232
© 2022 NJHSR
www.sanskritarticle.com

**डॉ. के. पुरुषोत्तमाचार्य**
सहायक आचार्य,
श्रीवेंकटेश्वर वैदिक विश्वविद्यालय,
तिरुपति

**Correspondence:**
**डॉ. के. पुरुषोत्तमाचार्य**
सहायक आचार्य,
श्रीवेंकटेश्वर वैदिक विश्वविद्यालय,
तिरुपति

# वेदोक्तमणिबन्धनम् - तत्फलञ्च - एकमध्ययनम्

**डॉ. के. पुरुषोत्तमाचार्य**

**उपोद्घातः –**

आदिकालादेव अलङ्कारार्थैः तद्वारा शरीरशोभार्थं मणयः विविधरूपेषु ध्रियन्ते। न केवलं जनसामान्ये, अपितु भौतिक पदार्थेषु वीतरागेषु विद्वज्जनेष्वपि मणिषु काचित दिव्यशक्तिः भवति, मणीनां धारणेन लैकिकजीवने अभ्युदयः भवतीति विश्वासः सहजतयैव वर्तते। मणीनामिदमस्ति वैशिष्ट्यं यत् सामान्योपचारैः येकेयन रोगाः शान्ताः न भवन्ति ते रोगाः केषाञ्चन मन्त्रप्रक्रियायां मणिबन्धनं शरीरस्य रक्षाकङ्कणं प्रतीयते। तस्य विधिवद्धारणेन आरोग्यम् शान्तिः उत्साहः प्रसन्नता इत्यादीनां वृद्धिः भूत्वा विभिन्नरोगाणां तथा विषादेश्च दूरीकरणं भवति शरीरात्। अथर्ववेदे मणीनां प्रभावशालि दिव्यकवच मेकमुक्तमस्ति। येस्राकत्यं मणिं जना वर्माणि कृण्वते। "सूर्य इव दिवमारुह्य विकृत्या बाधते वशि"[1] इति तत्सूत्रगतः कश्चनमन्त्रः। अस्य मन्त्रस्य अन्यमर्थः "ये जनाः अस्य मणिमयकवचस्य धारणं कुर्वन्ति, ते रविसदृशतेजस्विनः भूत्वा, स्वस्योपरि शत्रुभिः क्रियमाणान् घातकप्रयोगान् अपाकुर्यः" इति। एवमन्यत्रय कथितमथर्ववेदे "अस्मै मणिं वर्म बध्नन्तु देवा इन्द्रो विष्णुरसविता रुद्रो अग्निः। प्रजापतिः परमेष्ठी विराट् वैश्वानर ऋषयश्च सर्वे"[2]। सर्वेऋषयः देवाश्च इमं मणिरूपं कवचं मम शरीरे बध्नन्त्विति मन्त्रार्थः। अनेन ज्ञायते यत् मणिरूपस्य कवचस्य धारणात् शरीरे विभिन्नानां दैवीशक्तीनां प्रभावः उत्पन्नस्सन् शरीरगतविविधव्याधीनां, पीडानाञ्च शमनं कुर्वन् सर्वविधां रक्षां कृत्वा कामनानाञ्च पूर्ति करोतीति।

**मणीनां वैविध्यम् –**

इमे मणयः विविधाः तेषां धारणञ्च विविधं भवति। अङ्गुलीषु अङ्गुलीयकरूपेण, भुजयोः केयूर रूपेण, कर्णयोः कुण्डलरूपेण, कण्ठे हाररूपेण, शिरसि मकुटरूपेण ध्रियमाणेषु तेषुतेषु आभरणेषु इमे मणयः खचिताः अलङ्क्रियन्ते शरीरे। मणयः पार्थव जैविक – वानस्पतिक मूलपदार्थेभ्यः प्राप्यन्ते।

मणिषु स्वाभाविकाः कृत्रिमश्च भवन्ति। यद्यपि कौटिल्यादिभिः परिशोधकैः मणयः खनिज-सामुद्रिक-वानस्पतिक-प्राणिजभेदेन चतुर्था प्रोक्ताः तथापि सामुद्रिकमणयः प्रवमुक्तादि जैविकमणिषु अन्तर्भूताः भवन्तीति विदुषामभिप्रायः। आसुर्विज्ञानदृष्ट्या महत्वपूर्णानां कतिपयानाम् अधर्ववेदोक्तानां मणीनां सङ्क्षेपेण वर्णनं क्रियते अत्र पर्वतेषु भूम्यां भूगर्भेवा उत्पन्नात अयस्कान्तात् खनिजमणयः उत्पद्यन्ते। स्वर्ण-रजत-ताम्रादि लोहेभ्यः एवं धातुभ्य मणयः तथा माणिक्य-मरकद-पुष्यराग-वज्र-वैडूर्य-नीलादि नवरत्नानि जायन्ते। एतान्यपि रत्नानि खनिजमणिषु अन्तर्भूताः भवन्ति।

**अञ्जनमणिः –**

अयमञ्जनमणिः एकः खनिजपदार्थः पर्वतेषूत्पद्यमानः। अयं नेत्रयोः हितकरि, प्राणदायकः ओषधिविशेषश्च।[3] आथर्वणिकः एकः मन्त्रः अञ्जनमणेः गुणमेवं वर्णयति "उतासि परिपाणं यातुजम्भानमाञ्जन। उतामृतस्य त्वं वेत्थाथो असि जीवभोजनमथो हरित भेषजम्।[4] अस्य अयं भावः – हे अञ्जनमणे। त्वमस्माकं रक्षकोऽसि, विविधयातनाभ्यः, पीडाश्यश्च त्वं पालयसि, त्वमस्माकं रोगान अपाकत्यस्वास्थ्यं च प्रापय्य अस्माभ्यं मृत्युं दूरीकरोषि क्षयादि व्याधीन् नाशयित्वा सुखोपभोगेषु मनुष्यान् रक्षमान् करोषि। त्वं कामिलरोगस्य नाशकोऽसि" इति प्रशेसाक्रियते अञ्जनमणेः। अन्यत्र मन्त्रे यस्याञ्जन प्रसर्पस्यंगमंगपरुष्परुः। ततो यक्ष्मं विषाधस अग्रो मध्यमषीरिव 5 अयमाशयः अस्य मन्त्रस्य

यस्य मनुष्यस्य अङ्गे व्याधयः स्थिराः भवन्ति, तान् व्याधीन् त्वं तथा छिनत्सि यथा अन्तरिक्षस्थाः मेधाः एकत्रिताः प्रबलवातेन प्रताडिताः खण्डिताः भवन्ति" इति।

**अञ्जनमणिप्रभावः –**

नैनं प्राप्नोति शपथोनकृत्या नाभिशोचनम्। "नैनं विष्कन्धमश्नुते यस्त्वा बिभत्याञ्जन"।।[6] "हे अञ्जनमणे यः त्वां धरति, तस्य परशाप पीडा न भवति" इति मन्त्रार्थः। मन्त्रेणानेन अञ्जनमणिः प्रशंस्यते। अर्थात् अस्य अञ्जनमणिप्रयोगेण

मणिधारकस्य हानये तस्य शत्रुभिः कृताः प्रतिज्ञाः नफलन्ति। शत्रुकृतशापाः निर्वीर्याः भवन्ति। शत्रुकृताः दुष्टशक्तयः नश्यन्ति। शत्रूणां क्रूरदृष्टिः न पतति। शोकः न जायते। जाड्य-असद्विचारः – दुःस्वप्नजन्यं दुष्फलं-मनोमालिन्यं-चित्तवृत्तिषु दुष्टताच न प्रभवन्ति। सर्पादिविषमप्राणिनां प्राभावः अञ्जनमणिमतः विषये कार्यं न करोति। तत्रैव सूक्ते "त्रयोदासा अञ्जनस्य तक्माबलास आ दहिः। वषिष्ठाः पर्वतानां त्रिककुन्नाम ते पिता।[7] इत्यस्यामृचि अञ्जनमणिः श्लाध्यते एवं हे अञ्जन! त्रिककुत्पर्वतः तवपिता अस्ति। अर्थात् तव जनकः जन्मस्थानं वर्तते। पर्वतेषु सः श्रेष्ठतमः भवति, अतः त्रयः विषयाः तवदासाः सन्ति, तेच ज्वरः शरीरबलक्षयकारकसन्नि-पातादयः, सर्पविषादयश्च। अर्थात् ते रोगाः सर्पादयश्च तव वशे वर्तन्त इति भावः। तेषां चिकित्सा अञ्जनेन क्रियते।

**आयुर्वेदे अञ्जनस्य प्रशस्तिः –**

वैद्यकग्रन्थेष्वपि अञ्जनं बहुधा वर्ण्यते "स्रोतोऽञ्जनसमं ज्ञेयं सौवीरं तत्तु पाण्डुरम्। स्रोतोऽञ्जनं स्मृतं स्वादु चक्षुष्यं कफपित्तनुत्।। कषायं लेखनं स्निग्धं छर्दिग्राहि विषापहम्। सिध्मक्षयास्रहच्छीत सेवनीयं सदाबुधैः।।[8] एभिः प्रमाणवचनेः इदं ज्ञायते यत् वैद्यकग्रन्थेषु अञ्जनस्य ओषधीत्वं वर्णितं वर्तत इति। इदमञ्जनं स्वादु, अमृतं, नेत्रवृध्दिकरं, विषनाशकं, कफहरिमितिचोक्तम्। "परिपाणं पुरुषाणां परिपाणं गवामसि। अश्वानामर्वतां परिपाणाय तास्थिषे"।।[9] इत्यास्मिन्मन्त्रे मनुष्यैः सह पशूनां कृतेऽपि अञ्जनमणिः लाभदायि भवतीति कथितम्। "एहि जीवमित्याञ्जनमणिं बध्नाति"[10] इति कौसिकगृह्य सूत्रेण अञ्जनमणिबन्धनं कुर्यात् यजमानः। "एहि जीवं त्रायमाणम्" इति सूक्तस्य विनियोगः कार्यः। शान्तिकल्पाख्यग्रन्थो-क्तैरावतीशान्ति कर्मण्यपि अञ्जनमणिप्रयोगः विधीयते[11]

**अस्त्रुतमणिः –**

अयमस्तृतमणिः ओजोवर्चोषलायुषां पृध्यर्थं, रक्षार्थञ्च धार्यते। प्रजापतिस्त्वा बध्नात्प्रथममस्तृतं वीर्यायिकम्। तत्ते बध्नाम्यायुषे वर्चस ओजसेच बलायचास्तृतस्त्वाभि रक्षतु।।[12]

"हे अस्तृतमणे सर्वप्रथमं प्रजापतिः त्वामबध्नात्। तादृशं त्वां आयुरादिसर्वविध शरीरपुष्ट्यर्थं धारयामि" इति प्रार्थना अनेन मन्त्रेण क्रियते। अथर्ववेदानुसारम् अस्तृतमणिबन्धनेन नेत्रशक्तिः, प्राणशक्तिः, तथा बलञ्जवर्धते। "शतञ्च नप्रहरन्तो निघ्नन्तो नतस्तिरे। तस्मिन्निन्द्रः पर्यदत्तचक्षुः प्राणमथो बलमस्तृतस्त्वाभि रक्षतु।।[13] इति मन्त्रः अत्र प्रमाणं भवति। केचन व्याख्यातारः "अस्त्रित" शब्दव्याघ्रवाचकः इत्याचक्षते। समर्थनार्थं मन्त्रमेनमाथर्वणिकं दर्शयन्ति – "अस्मिन्मणावेकशतं वीर्याणि सहस्रं प्राणा अस्मिन्नस्तृते। व्याघ्रश्शत्रनभितिष्ठ सर्वान् यस्त्वा पृतन्याद धरस्सो अस्त्वस्तृतस्त्वाभि रक्षतु"[14] इति। अर्थात् अस्तृतमणेः व्याघ्रसादृश्यमत्र द्योतते। व्याघ्रनख शस्त्ररूपे अस्तृतमणौ शतप्रतिशतं वीर्यं बलञ्च वर्तेते। एवं सहस्रस्तृतमणेः धारणं कृत्वा व्याघ्रनखशस्त्ररूपस्य अस्य भावेण तव शत्रून् पराजितान् कुरु। अयमस्तृतमणिः सर्वतः त्वामभिरक्षतु इति मन्त्राशयः वर्तते। भाष्यकृता सायणाचार्येणापि "एवं वीर्यप्राणोपेतो मणिस्त्वं व्याघ्रः" इति व्याख्यातोऽयं मन्त्रः। भारतदेशे भीरवजनः व्याघ्रनखयुक्तं हारं कण्ठे धरन्ति। भयनाशय अस्तृतमणिः व्याघ्रनखेषु खचितः जनैः धृतः आसीत् प्राचीनकाले इत्यूहितु शक्यते। अद्यत्वे मणीनां दर्शनमेव विरलं जातम्। बलप्राप्त्यर्थं मरूदगणीमहाशान्ति कर्मणि अभिमन्त्रितस्य अस्तृतनामकस्य मणेः बन्धनं कुर्यादिति भाष्टकारः सायणः निर्देशमकरोत्।

**त्रिवृतमणिः –**

सुवर्णेन सह रजतेन, अयो रेणुभिश्च निर्मितं भवति त्रिवृतमणिः। एषमणिः आयुष्कारकः इति अथर्ववेदे कथितं विद्यते। सायणाचार्यः कौशिकसूत्रार्थं, (58/10) तथा नक्षत्रकल्पंच ववृण्वन् उपनयनान्तरम् आयुष्कामस्य माणवकस्य सूवर्णरजलोहमयानि शलाकान्येकत्र कृत्वा, नवशालाकं मणिं त्रिवृतं कृत्वा अबिमन्त्र्य बध्नाति, "तथा वैष्णव्याख्यायां महाशान्तौ त्रिवृन्मणि बन्धनेऽपि अस्य सूक्तस्य विनियोगः" इति त्रिवृतमणि धारणं प्रत्यपादयत्। नवप्राणान्नवभिस्संमिमीते धीर्घायुत्वाय शतशारदाय।।[15] दीर्घायुषे, शतवर्षजीवनाय नवप्राणाः नवभिः इन्द्रियैः समवेताः भवन्ति सुवर्णेन साकं त्रयः प्राणाः रजतेन साकं त्रयःप्राणाः अयसासह त्रयः प्राणाः उष्णेन मिलित्वा आच्छादिताः सन्ति

इति मन्त्रार्थः। "त्रीन् अवयवान् वृणोति त्रिवृत्" इत्यमरकोशे त्रिवृच्छब्दव्याख्या कृता अस्ति[16] लता विशेषोऽपि गृहयते तत्र। किन्तु प्रकृते प्राणानाम्, इन्द्रियाणां तथा सुवर्णरजतायसलोहानां त्रिवृत्संख्यया गृहीतत्वात् त्रिवृत्संख्यावता मन्त्रेण अभिमन्त्रितत्वाच्य अस्य मणेः त्रिवृत्संज्ञा प्रतीयते। केशवदेवनामकः कश्चनव्याख्याता स्वकीये "अथर्वसंहिताविधान्" इति ग्रन्थे त्रिवृतमणेः धारणं विधिमेवं विशदयति यदा भानुवासरे कृत्तिका अथवा पुष्यमी नक्षत्रं भवति, अथवा बृहस्पतिवासरे पुष्यनक्षत्रं वर्तते अथवा पूर्णतिययः यदा भवति तदा स्वर्ण-रजत-आभसलोहैः त्रिभिः मिश्रणेन निर्मितं त्रिवृन्मणिं (अङ्गुलीयकम्) पूर्वोक्तेन अथर्वसूक्तेन अभिमन्त्य, अग्नौ यथाविधि हुत्वा, सूर्योपस्थानपूर्वकं गोदधिमधुभिरभिषिष्य अङ्गुलीयकं धारयेत्।

**हिरण्यमणिः –**

हिरण्यमणिः हिरण्येन निर्मितः भूमौ खननेन लभ्यमानः दीर्घायुर्बलवर्चसां वर्धकः इति अथर्ववेदे वर्णितः वर्तते। यदाबध्नन् दाक्षायणा हिरण्यं शतानीकाय सुमनस्य मानाः। तत्ते बध्नाम्यायुषे वर्चसे बलायदीर्घायुत्वाय शतशारदाय।।[17] दक्षप्रजापतेः पुत्राः सुमनसः सन्तः शतानीकमृषिम् स्वहस्तेभ्यः अभिषिक्तमकुर्वन्। तस्मिन् सन्दर्भे आयुरादिफलकामाय तस्मै शतानीकाय "हे आसुरादिफलकाम शतानीक। आयुर्वृध्यै, तेजोवृध्यै, बलप्राप्त्यैच

तुभ्यम् इमं हिरण्यमणिं हिरण्यकङ्कणोपेतं बध्नामि। अनेन हिरण्यमणिबन्धनेन त्वं, शतमानं चिरंजीव इति हिरण्यमणि-बन्धनमकुर्वन्" इति समेऽपीमे गुणाः वेदोक्तहिरण्यमणेः प्रभावे वर्धयन्ति। अर्थात् सुवर्णस्य गुणाः मणेश्च गुणाः मिलित्वा गुणातिरेकेण प्रभावं दर्शयन्ति। धर्तुः यजमानस्य लाभाधिक्यं कल्पयन्ति। अद्यापि वज्र-वैढूर्य-पुष्यरागादि रत्नानि उध्दृत्य विविधाभरणरूपेण धारयन्तः जनाः स्वस्वग्रहपीडादि निवारयन्ति। मणीनामपि तच्छक्तिः शास्त्रेषु विस्तरशः वर्णितः।

**कृष्णलमणिः –**

अयं कृष्णलमणिः एकः खनिजः मणिः अस्ति। दीर्घायुष्यं प्राप्तुं हिरण्येमसह युगपत् बन्धनविधिः अथर्ववेदभाष्ये सायणाचार्येण दर्शितः वर्तते। इन्द्रनीलमणिरेव कृष्णलणिरिति विद्वासः मन्यन्ते।

ज्योतिषशास्त्रीदिशा नीलमणिः शनिग्रहसम्बन्धीति कृत्वा नीलमणेः कृष्णलमणेः धारणेन शनिग्रहजन्याः पीडाः शाम्यन्तीति जनानां विश्वासः।

**श्वासकासहरं वृष्यं त्रिदोषघ्नं सदीपनम्।**
**विषमज्वरदुर्नाम पापघ्नं नीलमीरितम्।।**[18]

इतीजमायुर्वेदग्रन्थस्थं पद्यं अस्य नीलमणिसंज्ञककृष्णलमणेः गुणधर्मान् विवृणोति। यदाबध्नन् दाक्षायणा हिरण्यं शतानिकाय सुमनस्यमानाः। तत्ते बध्नाम्यायुषे वर्चसे बलाय दीर्घायुत्वाय शतशरदाय[19] इत्यस्य सूक्तस्य भाष्ये सायणः इममपि कृष्णलमणिमुदाजहार।

**लोममणिः –**

अयं गोचर्मणिः जैविकमणिरूप्यते। जैविकमणिः अयमुच्यते यः जीवितस्य मृतस्य वा पशोः जन्तोर्वाः सम्बन्धी भवति। रक्तवर्णायाः गोः लोमभिः मणिं बध्वातस्य धारणेन हृद्रोगाः तथा कामिलरोगाश्च नश्यन्ति। अनुसूर्य मुदयतां हृद्योतो हरिमायते। गोरोहितस्य वर्णेन तेन त्वा परिदध्मसि।[20] अनेन मन्त्रेण रोगी आश्वास्यते, "हे व्याधित, तव हृद्रोगः, कामिलरोगश्च सूर्यस्य अभिमुखमुदगच्छताम्। लोहितगोवर्णेन त्वामाच्छादयामि" इति मन्त्रार्थः। अस्मिन्नेव सूक्ते या रोहिर्णीर्देवत्या गावो य उत रोहिणीः। रूपं रूपं वयो वयस्ताभिष्टवा परिदध्मसि[21] इति मन्त्रे" कामधेनवः लोहितवर्णसंयुताः देवतासम्बध्दाश्च भवन्ति। तथैव कपिलगावः मानवसम्बध्दाः सन्ति। द्वयोः तयोः रूपं, तथा यौवनञ्च परिगृह्य हे रोगिन् त्वयि प्रवेशयामि" इति रोगनिवारकोपायः ज्ञायते। व्याख्याकारः केशवः व्याधिनाशाय एवं लिखति "अनुसूर्यमुदयताम्" इति सूक्तेन सुवर्णवेष्टितं मणिं कृत्वा सम्पात्याभिमन्त्र्य, व्याधतं बध्नाति[22] इति एवमेव तमस्य कौशिकसूत्रस्य व्याख्यायां "हस्तिलोमालि लाक्षाहिरण्येन वेष्टयित्वा बध्नाति मेषनभि रोममणिं लाक्षाहिरण्येन वेष्टयित्वा बध्नाति" इति लिखन् लोममणिं विधत्ते। वेदभाष्यकृता सायणाचार्येणापि "सिंहे व्याघ्र उतया पृदाकौ[23] इति तृचाभ्यां वर्चस्कामास्नातासिंह-व्याघ्रादीनां सूत्रोक्तानां सप्तानाम् अन्यतमस्य नाभिलोममणिं लाक्षाहिरण्याभ्यां वेष्टयित्वा सम्पात्य अभिमन्त्र्य बध्नीयात्" इति लोममणिबन्धनक्रमं विधत्ते।

**शङ्खमणिः –**

एषः शङ्खमणिः अथर्ववेदोक्तजैविकमणिष अन्यतमः अस्ति। शङ्खे जायमानं मौक्तिकमेव शङ्खमणिः कथ्यते। वाताज्जातो अन्तरिक्षाद्विद्युतो ज्योतिषस्पीर। सनो हिरण्यजाः शङ्खाः कशनः पात्वंहसः।[24] इत्यस्मिन् मन्त्रे शङ्खमणिप्रस्तुतिः श्रूयते। "वायोः जातः अन्तरिक्षात् जायमानः विद्याल्लतायाः ज्योतिर्मण्डलात् हिरण्यात् जातः शङ्खमणिः शत्रुञ्रयोः भूत्वा अस्मान् रक्षतु पापेभ्यः रक्षतु" इत्यर्थः अस्य मन्त्रस्य। यदा मेघा गर्जन्ति सूर्यश्च प्रकाशते तास्मिन् समये मेघेभ्यः निः सतः जलबिन्दः शङ्खमुखे पतन् मौक्तिकं भवति। कौटिल्यस्य अर्थशास्त्रे मणिसंग्रहप्रकरणाख्ये ग्रन्थेऽपि शुक्तेः शङ्खादपि मुक्ताफलस्य उत्पत्तिरूक्ता।

**तथाच मन्त्रः –**

यो अग्रतो रोचनानां समुद्रादधिजज्ञिषे। यो अग्रतो रोचनानां समुद्रादधिजज्ञिषे। शङ्खेन हत्वा रक्षांस्यत्रिणो विषहामहे।[25] अस्यायमाशयः, "हे शङ्ख! त्वं प्रकाशमानपदार्थेषु अग्रणीः असि। समुद्रात् जातोऽसि। मानव भक्षणशीलान् पिशाचान् त्वत्सहायेन पराभूतान् कुर्मः" इति शङ्खप्रार्थना अत्रवर्तते। ईदृशात् प्रकाशमानशङ्खात् जातः शङ्खमणिः अत्यन्तं प्रकाशनशीलः अस्ति किञ्च शङ्खमणेः आयुर्वर्धकत्वं द्योतयति अन्यः कश्चन मन्त्रः - "दिविजातस्समुद्रतास्सिन्धुतस्पर्याभृतः। सनोहिरण्यजाश्शङ्खः आयुष्प्रतरणो मणिः"।[26] "अन्तरिक्षात् जातः समुद्रात् जातः नदीमुखात् आहृतः, हिरण्यात् जातश्चायं शङ्खमणिः अस्माकम् आयुर्वर्धकः भूयात्" इति मङ्गलाशासनम् अनेन मन्त्रेण क्रियते। अत्र शङ्खस्य, अथवा शुक्तेः मणिषु गणना न भवति। एतयोः जातस्य मुक्ताफलस्य तु मणिषु गणना भवत्येव।

**उपसंहारः –**

आयुर्वेदे विविध मणीनां धारणम् उपचारार्थं क्रियते। अत्र अयुर्वेदाचार्याणां शुश्रुतादीणां ग्रन्थेषु कृतानि उल्लेखनानि प्रमाणभूतानि भवन्ति। "मुक्ताविद्रुम वज्रेन्द्र वैडूर्य स्फटिकादयः। चक्षुष्या मणयश्शीता लेखना विषसूदनाः"[27]। इति अचार्येण शुश्रुतेन प्रोक्तमस्ति विषसूदनादिप्रयोजनार्थं मणिबन्धनं कर्तव्यमिति। प्रमुखभिषगाचार्येण चरकेनापि कथितं वर्तते मणिबन्धनविषये – "धार्यमणिर्या च वरोषध्यो विषापहः। तथा च मणयश्च धारणीयाः, मणीनामौषधीनाञ्च माङ्गल्यानां विषस्य च। धारणादगदानाञ्च सेवनान्न भवेद्ज्वरः"।[28] एवमेतेषां मणीनां धारणेन व्याधीनां चिकित्सा लभ्यते। प्राचीन भारते ज्योतिषशास्त्रम् एवं आयुर्वेदशास्त्रं च आधारीकृत्य दृढगात्रतासिध्यर्थं उपर्यिक्तप्रकारेण मणीनां बन्धनं प्रचुरप्रचारे आसीत्। इदानीं तने कालेपि मणीनां धारणे भारते तदन्यत्र च जनेषु अतीव विश्वासः वर्तत इति विषयः विदितचरः एवेति विज्ञाप्य शोधपत्रस्य अस्य अथर्ववेदान्तर्गतमणिबन्धन-विषयकस्य विरमणमनेन क्रियते।

**ग्रन्थसूची –**

1. अथर्ववेदसंहिता
2. भावप्रकाशनिघन्टुः
3. कौशिकसूत्रम्
4. शान्तिकल्पः
5. अमरकोशः
6. रसतन्त्रसारः
7. केशवपद्धतिः

**पाद टिप्पणी –**

1. अ.वे. 8.5.7
2. अ.वे.8.5.10
3. अ.वे.4.9.1 ”एहि जीवं जायमाणं पर्वतस्यास्य कक्ष्यम्। विश्वोर्तेवेदत्तं परिझिर्जीवनायकम्। हे अञ्जन! जीवात्मानं पालयितु मागच्छ। त्वं त्रिकूटवर्वतस्य नेत्रमसि। त्वमस्माकं चिरजीवनार्थं इन्द्रादिसर्वैः देवैः दत्तं परिधिः विराजसे” इति मन्त्रेऽस्मिन् अञ्जनमणिः प्राश्यते।
4. अ.वे. 4.9.3
5. अ.वे. 4.9.4
6. अ.वे. 4.2.9.5
7. अ.वे. 4.2.98
8. भावप्रकाशनिघण्टुः
9. अ.वे.सं. 4.29.2
10. कौशिकसूत्रम् 7.9
11. शान्तिकल्पः 19.9
12. अ.वे. 19.4.46.1
13. अ.वे.सं.19.4.46.3
14. अ.वे.सं. 19.4.46.5
15. अ.वे.सं. 5.6.28.1
16. अमरकोशः 2.4.108
17. अ.वे.सं. 1.6.35.1
18. रसतन्त्रसारः
19. अ.वे. 1.6.35.1
20. अ.वे.सं. 1.5.22.1
21. अ.वे.सं. 1.5.22.3
22. केशवपध्दतिः व्याख्याकौसिक सूत्रम् 2.21
23. अ.वे.सं. 6.38.1
24. अ.वे.सं. 4.2.10.1
25. अ.वे.सं. 4.2.10.2
26. अ.वे.सं. 4.2.10.4
27. सु.सू. 26.18
28. च.सं. 23.252